# Sankhya Sutra

विषयाध्यायः

१.१ अथ त्रिविधदुःखात्यन्तनिवृत्तिः अत्यन्त पुरुषार्थः। (परमपुरुषार्थस्वरूपं)

१.२ न दृष्टात् तत्सिद्धिः, निवृत्तेऽप्यनुवृत्ति दर्शनात्। (लौकिकोपायैः दुःखनिवृत्त्यनुपपत्तिः)

१.३ प्रात्यहिक क्षुत्प्रतीकारवत् तत्प्रतीकार चेष्टनात् पुरुषार्थत्वं। (लौकिकोपायैः दुःखनिवृत्त्यनुपपत्तिः)

१.४ सर्वासम्भवात्, सम्भवेऽपि सत्तासम्भवात् हेयः प्रमाणकुशलैः। (लौकिकोपायैः दुःखनिवृत्त्यनुपपत्तिः)

१.५ उत्कर्षादपि मोक्षस्य सर्वोत्कर्षश्रुतेः। (लौकिकोपायैः दुःखनिवृत्त्यनुपपत्तिः)

१.६ अविशेषश्चोभयोः। (वैदिकोपायानामपि दुःखनिवृत्त्यनुपायता)

१.७ न स्वभावतो बद्धस्य मोक्षसाधनोपदेशविधिः। (बन्धस्य स्वाभाविकत्वानुपपत्तिः)

१.८ स्वभावस्यानपायित्वात्, अननुष्ठानलक्षणमप्रामाण्यं। (बन्धस्य स्वाभाविकत्वानुपपत्तिः)

१.९ नाशक्योपदेशविधिः, उपदिष्टेऽप्यनुपदेशः। (बन्धस्य स्वाभाविकत्वानुपपत्तिः)

१.१० शुक्लपटवत् बीजवच्चेत्। (बन्धस्य स्वाभाविकत्वानुपपत्तिः),पू

१.११ शक्त्युद्भवानुद्भवाभ्यां नाशक्योपदेशः। (बन्धस्य स्वाभाविकत्वानुपपत्तिः),सि

१.१२ न कालयोगतो व्यापिनो नित्यस्य सर्वसम्बन्धात्। (बन्धस्य कालदेशनिमित्तकत्वानुपपत्तिः)

१.१३ न देशयोगतोऽप्यस्मात्। (बन्धस्य कालदेशनिमित्तकत्वानुपपत्तिः)

१.१४ नावस्थातो देहधर्मत्वात्तस्याः। (बन्धस्य अवस्थाविशेषनिमित्तकत्वानुपपत्तिः)

१.१५ असङ्गो ह्ययं पुरुष इति। (बन्धस्य अवस्थाविशेषनिमित्तकत्वानुपपत्तिः)

१.१६ न कर्मणाऽन्यधर्मत्वात् अतिप्रसक्तेश्च। (बन्धस्य अवस्थाविशेषनिमित्तकत्वानुपपत्तिः)

१.१७ विचित्रभोगानुपपत्तिः अन्यधर्मत्वे। (बन्धस्य चित्तगात्रधर्मत्वानुपपत्तिः)

१.१८ प्रकृतिनिबन्धनाच्चेन्न तस्या अपि पारतन्त्र्यं। (बन्धस्य प्रकृतिनिमित्तकत्वानुपपत्तिः)

१.१९ न नित्यशुद्ध बुद्धमुक्त स्वभावस्य तद्योगस्तद्योगाहते। (बन्धस्य प्रकृतिनिगित्तकत्वानुपपत्तिः)

१.२० नाऽविद्यातो ऽ प्यवस्तुना बन्धायोगात्। (बन्धस्य अविद्यानिमित्तकत्वनिरासः)

१.२१ वस्तुत्वे सिन्धान्तहानिः। (बन्धस्य अविद्यानिमित्तकत्वनिरासः)

१.२२ विजातीयद्वैतापत्तिश्च। (बन्धस्य अविद्यानिमित्तकत्वनिरासः)

१.२३ विरुद्धोभयरूपा चेत्। (बन्धस्य अविद्यानिमित्तकत्वनिरासः),पू

१.२४ न तादृक्पदार्थाप्रतीतेः। (बन्धस्य अविद्यानिमित्तकत्वनिरासः),सि

१.२५ न वयं षट्पदार्थवादिनः वैशेषिकादिवत्। (बन्धस्य अविद्यानिमित्तकत्वनिरासः),पू

१.२६ अनियतत्वेऽपि नायौक्तिकस्य संग्रहः, अन्यथा बालोन्मत्तादिसमत्वं। (बन्धस्य अविद्यानिमित्तकत्वनिरासः),सि

१.२७ नानादिविषयोपराग निमित्तकोऽप्यस्य। (बन्धस्य विषयवासनानिमित्तकत्वनिरासः)

१.२८ न बाह्याभ्यन्तरयोः उपरज्योपञ्जक भावोऽपि देशव्यवधानात् स्रुघ्नस्थ पाटलिपुत्रस्थयोरिव। (बन्धस्य विषयवासनानिमित्तकत्वनिरासः)

१.२९ द्वयोरेकदेशलब्धोपरागान्न व्यवस्था। (बन्धस्य विषयवासनानिमित्तकत्वनिरासः)

१.३० अदृष्टवशाच्चेत्। (बन्थस्य विषयवासनानिमित्तकत्वनिरासः),पू

१.३१ न द्वयोरेककालयोगादुपकार्योपकारकभावः। (बन्धस्य विषयवासनानिमित्तकत्वनिरासः),सि

१.३२ पुत्रकर्मवदिति चेत्। (बन्धस्य विषयवासनानिमित्तकत्वनिरासः),पू

१.३३. नास्ति हि तत्र स्थिर एक आत्मा यो गर्भाधानादिकर्मणा संस्क्रियते। (बन्धस्य विषयवासनानिमित्तकत्व निरासः),सि

१.३४ स्थिरकार्यासिद्धेः क्षणिकत्वं। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः) ,पु

१.३५ न प्रत्यभिज्ञाबाधात्। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः) ,सि

१.३६ श्रुतिन्यायविरोध्श्वच्च। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.३७ दृष्टान्तासिद्धेश् च। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.३८ युगपज्जायमानयोः न कार्यकारणभावः। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.३९ पूर्वापाये उत्तरायोगात्। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.४० तद्भावे तदयोगात् उभयव्यभिचारादपि न। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.४१ पूर्वभावमात्रे न नियमः। (बन्धादीनां सर्वेषामपि क्षणिकत्व वादनिरासः)

१.४२ न विज्ञानमात्रं बाह्यप्रतीतेः। (बन्धादीनां विज्ञानमात्रस्वरूपत्वनिरासः)

१.४३ तदभावे तदभावात् शून्यं तर्हि। (बन्धादीनां विज्ञानमात्रस्वरूपत्वनिरासः)

१.४४ शून्यं तत्त्वं, भावो विनश्यति, वस्तुधर्मत्वात् विनाशस्य। (सर्वशून्यतावादखण्डनं),पू

१.४५ अपवादमात्रं अबुद्धानां। (सर्वशून्यतावादखण्डनं),सि

१.४६ उभयपक्षसमानक्षेमत्वादयमपि। (सर्वशून्यतावादखण्डनं)

१.४७ अपुरुषार्थत्वमुभयथा।(सर्वशून्यतावादखण्डनं)

१.४८ न गतिविशेषात्। (आत्मनो गतिविशेषस्य बन्धनिमित्तत्वनिरासः)

१.४९ निष्क्रियस्य तदसम्भवात्। (आत्मनो गतिविशेषस्य बन्धनिमित्तत्वनिरासः)

१.५० मूर्तत्वात् घटादिवत् समानधर्मापत्तौ अपसिद्धान्तः। (आत्मनो गतिविशेषस्य बन्धनिमित्तत्वनिरासः)

१.५१ गतिश्रुतिरपि उपाधियोगादाकाशवत्। (आत्मनो गतिविशेषस्य बन्धनिमित्तत्वनिरासः)

१.५२ न कर्मणाऽप्यतद्धर्मत्वात्। (कर्मणो बन्धनिमित्तत्वनिरासः)

१.५३ अतिप्रसक्तिः अन्यधर्मत्वे। (कर्मणो बन्धनिमित्तत्वनिरासः)

१.५४ निर्गुणादि श्रुतिविरोधश्चेति। (कर्मणो बन्धनिमित्तत्वनिरासः)

१.५५ तद्योगोऽप्यविवेकान्न समानत्वं। (अविवेकनिमित्तप्रकृतिपुरुषसंयोगस्यैव बन्धहेतुत्वं)

१.५६ नियतकारणात्तदुच्छित्तिः ध्वान्तवत्। (विवेकस्यैव अविवेक नाशहेतुत्वं)

१.५७ प्रधानाविवेकात् अन्याविवेकस्य तद्धाने हानं। (विवेकस्यैव अविवेक नाशहेतुत्वं)

१.५८ वाङ्मात्रं न तुतत्त्वं चित्तस्थितेः। (चित्तस्थितस्यापि पुरुषसंक्रान्तस्य बन्धस्य स्वात्मसाक्षात्कार निवर्त्यत्वं)

१.५९ युक्तितोऽपि न बाध्यते दिङ्मूढवपरोक्षाहते। (चित्तस्थितस्यापि पुरुषसंक्रान्तस्य बन्धस्य स्वात्मसाक्षात्कार निवर्त्यत्वं)

१.६० अचाक्षुषाणामनुमानेन बोधः धूमादिभिरिव वह्नेः। (प्रकृतिपुरुषयोरानुमानिकत्वं)

१.६१ सत्वरजस्तमसां साम्यावस्था प्रकृतिः, प्रकृतेर्महान्, महातोऽहङ्कारः, अहङ्कारात् पञ्चतन्मात्राणि, उभयमिन्द्रियं तन्मात्रेभ्यः,स्थूलभूतानि पुरुषः इति पञ्चविंशतिर्गणः। (पञ्चविंशतितत्त्वसिद्धिः)

१.६२ स्थूलात् पञ्चतन्मात्रस्य। (पञ्चविंशतितत्त्वसिद्धिः)

१.६३ बाह्याभ्यन्तराभ्यां तैश्चाहङ्कारस्य। (पञ्चविंशतितत्त्वसिद्धिः)

१.६४ तेनान्तः करणस्य। (पञ्चविंशतितत्त्वसिद्धिः)

१.६५ ततः प्रकृतेः। (पञ्चविंशतितत्त्वसिद्धिः)

१.६६ संहतपरार्थत्वात् पुरुषस्य। (पञ्चविंशतितत्त्वसिद्धिः)

१.६७ मूले मूलाभावादमूलं मूलं। (प्रकृतेरेव सर्वजगन्मूलत्वं)

१.६८ पारम्पर्यैऽपि एकत्र परिनिष्ठेति संज्ञामात्रं। (प्रकृतेरेव सर्वजगन्मूलत्वं)

१.६९ समाजः प्रकृतेर्द्वयोः। (प्रकृतेरेव सर्वजगन्मूलत्वं)

१.७० अधिकारित्रैविध्यात् न नियमः। (विवेकमननस्य असार्वत्रिकत्वे हेतुः)

१.७१ महदाख्यं आद्यं कार्यं तन्मनः। (महत्तत्वस्वरूपं)

१.७२ चरमोऽहङ्कारः। (अहङ्कारतत्वस्वरूपं)

१.७३ तत्कार्यत्वमुत्तरेषां। (तन्मात्रादीनां अहङ्कारकार्यत्वेऽपि प्रकृतिकार्यत्वोपपतिः)

१.७४ आद्यहेतुता तद्द्वारा पारम्पर्येऽप्यणुवत्। (तन्मात्रादीनां अहङ्कारकार्यत्वेऽपि प्रकृतिकार्यत्वोपपतिः)

१.७५ पूर्वभावित्वे द्वयोरेकतरस्य हाने अन्यतरयोगः। (प्रकृतेरेव सर्वकारणत्ते नियामकं)

१.७६ न परिच्छिन्नं सर्वोपादानं। (प्रकृतेरेव सर्वकारणत्वे नियामकं)

१.७७ तदुत्पात्तिश्रुतेश्च। (प्रकृतेरेव सर्वकारणत्वे नियामकं)

१.७८ नावस्तुनो वस्तुसिद्धिः। (शून्यस्य जगत्कारणतायाः,जगतः शून्यतायाश्च खण्डनं)

१.७९ अबाधात् अदुष्टकारण जन्यत्वाच्च नावस्तुत्वं। (शून्यस्य जगत्कारणतायाः,जगतः शून्यतायाश्च खण्डनं)

१.८० भावे तद्योगेन तत्सिद्धिः, अभावे तदभावात् कुतस्तरां तत्सिद्धिः। (शून्यस्य जगत्कारणतायाः,जगतः शून्यतायाश्च खण्डनं)

१.८१ न कर्मण उपादानत्वायोगात्। (कर्मणां जगदपादानाता निरासः)

१.८२ नानुश्रविकादपि तत्सिद्धिः, साध्यत्वेनाऽऽवृत्तियोगादपुरुषार्थत्वं। (लौकिक वैदिक कर्मणां परमपुरुषार्थहेतुत्वखण्डनं)

१.८३ तत्र प्राप्तिविवेकस्य अनावृत्तिश्रुतिः। (लौकिक वैदिक कर्मणां परमपुरुषार्थहेतुत्वखण्डनं)

१.८४ दुःखाद्दुःखं जलभिषेकवन्न जाड्यविमोकः। (लौकिक वैदिक कर्मणां परमपुरुषार्थहेतुत्वखण्डनं)

१.८५ काम्येऽकाम्येपि साध्यत्वाविशेषात्। (लौकिक वैदिक कर्मणां परमपुरुषार्थहेतुत्वखण्डनं)

१.८६ विजमुक्तस्य बन्धध्वंसमात्रं, परं न समानत्वं। (लौकिक वैदिक कर्मणां परमपुरुषार्थहेतुत्वखण्डनं)

१.८७ द्वयोरेकतरस्यवाऽप्यसन्निकृष्टार्थपरिच्छित्तिः प्रमा, तत्साधकतमं यत्तत्त्रिविधं प्रमाणं। (प्रमा स्वरूपं, प्रमाणेयत्ता च)

१.८८ तत्सिद्धौ सर्वसिद्धेः नाधिक्यसिद्धिः। (प्रमा स्वरूपं, प्रमार्णयत्ताच)

१.८९ यत् संबद्धं सत् तदाकारोल्लेखि विज्ञानं तत् प्रत्यक्षं। (प्रत्यक्षलक्षणं)

१.९० योगिनामबाह्यप्रत्यक्षत्वात् न दोषः। (प्रत्यक्षलक्षणं)

१.९१ लीनवस्तुलब्धातिशयसम्बन्धाद्वाऽदोषः। (प्रत्यक्षलक्षणं)

१.९२ ईश्वरासिद्धेः। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९३ मुक्तामुक्तयोः अत्यतराभावान्न तत्सिद्धिः। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९४ उभयथाऽप्यसत्करत्वं। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९५ मुक्तात्मनः प्रशंसा उपासा सिद्धस्य वा। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९६ तत्सन्निधानात् अधिष्ठातृत्वं मणिवत्। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९७ विशेषकार्येष्वपि जीवानां। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९८ सिद्धरूप बोद्धृत्वात् वाक्यार्थोपदेशः। (तदङ्गतया ईश्वरसत्ता निरासः)

१.९९ अन्तः करणस्य तदुज्ज्वलितत्वात् लोहवत् अधिष्ठातृत्वं। (अन्तः करणस्यैव मुख्यमधिष्ठानत्वं)

१.१०० प्रतिबन्धदृशः प्रतिबद्धज्ञानमनुमानं। (अनुमान लक्षणं)

१.१०१ आप्तोपदेशः शब्दः। (शब्द लक्षणं)

१.१०२ उभयसिद्धिः प्रमाणात्तदुपदेशः। (प्रमाणस्वरूपविवेचन फलं)

१.१०३ सामान्यतो दृष्टादुभयसिद्धिः। (सामान्यतोदृष्टरूपानुमानविशेषनिरूपणं)

१.१०४ चिदवसानो भोगः। (निर्दुष्टं प्रमास्वरूपं)

१.१०५ अकर्तुरपि फलोपभोगोऽन्नाद्यवत्। (कर्तृत्वफलभोगयोः वैयधिकरण्यशंकायाः समाधानं)

१.१०६ अविवेकाद्वा तत्सिद्धेः कर्तुः फलावगमः। (कर्तृत्वफलभोगयोः वैयधिकरण्यशंकायाः समाधानं)

१.१०७ नोभयं च तत्वाख्याने। (प्रकृत्यादेरिन्द्रियाविषयत्वोपाधयः)

१.१०८ विषयोऽविषयोऽप्यतिदूरादेर्हानोपादानाभ्यामिन्द्रियस्य। (प्रकृत्यादेरिन्द्रियाविषयत्वोपाधयः)

१.१०९ सौक्ष्म्यात्तदनुपलरुब्धिः। (प्रकृत्यादेरिन्द्रियाविषयत्वोपाधयः)

१.११० कार्यदर्शनात्तदुपलब्धेः। (प्रकृत्यादेरिन्द्रियाविषयत्वोपाधयः)

१.१११ वादिविप्रतिपत्तेः तदसिद्धिरिति चेत्। (सत्कार्यवाद निरूपणं),पू

१.११२ तथाऽप्येकतरदृष्ट्या एकतरसिद्धेः नापलापः। (सत्कार्यवाद निरूपणं),सि

१.११३ त्रिविधविरोधापत्तेश्च। (सत्कार्यवाद निरूपणं)

१.११४ नासदुत्पादो नृशृङ्गवत्। (असत्कार्यवादनिराकरणं)

१.११५ उपादाननियमात्। (असत्कार्यवादनिराकरणं)

१.११६ सर्वत्र सर्वदा सर्वासम्भवात्। (असत्कार्यवादनिराकरणं)

१.११७ शक्तस्य शक्यकरणात्। (असत्कार्यवादनिराकरणं)

१.११८ कारणभअवाच्च। (असत्कार्यवादनिराकरणं)

१.११९ न भावे भावयोगश्चेत्। (सतः कार्यत्वोपपत्तिः),पू

१.१२० नाभिव्यक्तिनिबन्धनौ व्यवहाराव्यवहारौ। (सतः कार्यत्वोपपत्तिः),सि

१.१२१ नाशः कारणलयः। (नाशस्वरूपं)

१.१२२ पारम्पर्यतोऽन्वेषणा बीजाङ्कुरवत्। (अभिव्यक्तिपक्षे अनवस्थापरिहारः)

१.१२३ उत्पत्तिवददोषः। (अभिव्यक्तिपक्षे अनवस्थापरिहारः)

१.१२४ हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गं। (कार्यस्वरूपं)

१.१२५ आञ्जस्यादभेदतोवा गुणसामान्यादेः तत्सिद्धिः प्रधानव्यपदेशाद्वा। (कार्यस्वरूपं)

१.१२६ त्रिगुणाचेतनत्वादि द्वयोः। (कार्यकारणयोः साधर्म्यवैधर्म्ये)

१.१२७ प्रीत्यप्रीतिविषादाद्यैः गुणानां अन्योन्यं वैधर्म्यं। (कार्यकारणयोः साधर्म्यवैधर्म्ये)

१.१२८ लध्वैदि धर्मैः साधर्म्यं च गुणानां। (कार्यकारणयोः साधर्म्यवैधर्म्ये)

१.१२९ उभयान्यत्वात् कार्यत्वं महदादेर्घटादिवत्। (महदादेः कार्यत्वोपपत्तिः)

१.१३० परिमाणात्। (महदादेः कार्यत्वोपपत्तिः)

१.१३१ समन्वयात्। (महदादेः कार्यत्वोपपत्तिः)

१.१३२ शक्तितश्चेति। (महदादेः कार्यत्वोपपत्तिः)

१.१३३ तद्धाने प्रकृतिः पुरुषो वा। (महदादेः कार्यत्वोपपत्तिः)

१.१३४ तयोरन्यत्वे तुच्छत्वं। (महदादेः कार्यत्वोपपत्तिः)

१.१३५ कार्यात्कारणानुमानं तत्साहित्यात्। (कार्यैः कारणानुमानविधिः)

१.१३६ अव्यक्तं त्रिगुणाल्लिङ्गात्। (कार्येभ्यः प्रकृतेः वैधर्म्यं)

१.१३७ तत्कार्यतस्तत्सिद्धेर्नापलापः। (कार्येभ्यः प्रकृतेः वैधर्म्यं)

१.१३८ सामान्येन विवादाभावात् धर्मवन्न साधनं। (पुरुषास्तित्व साधनं)

१.१३९ शरीरादिव्यतिरिक्तः पुमान्। (पुरुषास्तित्व साधनं)

१.१४० संहतपरार्थत्वात्। (पुरुषास्तित्व साधनं)

१.१४१ त्रिगुणादिविपर्ययात्। (पुरुषास्तित्व साधनं)

१.१४२ अधिष्ठानाच्चेति। (पुरुषास्तित्व साधनं)

१.१४३ भोतृभावात्। (पुरुषास्तित्व साधनं)

१.१४४ कैवल्यार्थं प्रवृत्तेश्च। (पुरुषास्तित्व साधनं)

१.१४५ जडप्रकाशायोगात्प्रकाशः। (पुरुषस्य प्रकाशस्वरूपत्वं)

१.१४६ निर्गुणत्वान्नचिद्धर्मा। (प्रकाशात्मनोः धर्मधर्मिभअव निराकरणं)

१.१४७ श्रुत्या सिद्धस्य नापलापस्तत्प्रत्यक्षबोधात्। (प्रकाशात्मनोः धर्मधर्मिभअव निराकरणं)

१.१४८ सुषुप्त्याद्यसाक्षित्वं। (प्रकाशात्मनोः धर्मधर्मिभआव निराकरणं)

१.१४९ जन्मादुव्यवस्थातः पुरुषबहुत्वं। (पुरुषबहुत्व साधनं)

१.१५० उपाधिभेदेऽप्येकस्य नानायोगः आकाशस्येव घटादिभिः। (पुरुषबहुत्व साधनं)

१.१५१ उपाधिर्भिद्यते न तु तद्वान्। (पुरुषबहुत्व साधनं)

१.१५२ एवमेकत्वेन परिवर्तमानस्य न विरुद्ध धर्माध्यासः। (पुरुषबहुत्व साधनं)

१.१५३ अन्यधर्मत्वेऽपि नारोपात्तत्सिद्धिरेकत्वात्। (पुरुषबहुत्व साधनं)

१.१५४ नाद्वैतश्रुतिविरोधो जातिपरत्वात्। (आत्मैक्यवादोपपत्तिः)

१.१५५ विदितबन्धकारणस्य दृष्ट्याऽतद्रूपं। (आत्मैक्यवादोपपत्तिः)

१.१५६ नान्धादृष्ट्या चक्षुष्मतामनुपलम्भः। (आत्मैक्यवादोपपत्तिः)

१.१५७ वामदेवादिर्मुक्तो नाद्वैतं। (आत्मैक्यवादोपपत्तिः)

१.१५८ अनादावद्यावदभावाद्भविष्यदप्येवं। (आत्मैक्यवादोपपत्तिः)

१.१५९ इदीनीमिव सर्वत्र नात्यन्तोच्छेदः। (आत्मैक्यवादोपपत्तिः)

१.१६० व्यावृत्तोभयरूपः। (आत्मनां सदैकरूपत्वं)

१.१६१ साक्षात्सम्बन्धात्साक्षित्वं। (आत्मनां सदैकरूपत्वं)

१.१६२ नित्यमुक्तत्वं। (आत्मनां सदैकरूपत्वं)

१.१६३ औदासीन्यं चेति। (आत्मनां सदैकरूपत्वं)

१.१६४ उपरागात्कर्तृत्वं चित्सान्निध्यात् चित्सान्निध्यात्। (वस्तुतत्त्वविपरीततय पुरुषे कर्तृतायाः बुद्धौ ज्ञातृतायाश्च भाने हेतुः।

प्रधानकार्य

२.१ विमुक्तमोक्षार्थं स्वार्थं वा प्रधानस्य। (प्रकृतेः जगत्सृष्टौ निदानभूताः अंशाः)

२.२ विरक्तस्य तत्सिद्धेः। (प्रकृतेः जगत्सृष्टौ निदानभूताः अंशाः)

२.३ न श्रवणमात्रात्तत्सिद्धिः अनादिवासनायाः बलवत्त्वात्। (प्रकृतेः जगत्सृष्टौ निदानभूताः अंशाः)

२.४ बहुभृत्यवद्वा प्रत्येकं। (प्रकृतेः जगत्सृष्टौ निदानभूताः अंशाः)

२.५ प्रकृतिवास्तवे च पुरुषस्याध्याससिद्धिः। (पुरुषे स्रष्ट्रत्वनिराकरणं)

२.६ कार्यतस्तत्सिद्धेः। (पुरुषे स्रष्ट्रत्वनिराकरणं)

२.७ चेतनोद्देशान्नियमः कण्टकमोक्षवत्। (पुरुषे स्रष्ट्रत्वनिराकरणं)

२.८ अन्ययोगेऽपि तात्सिद्धिर्नाञ्जस्येनायोदाहवत्। (पुरुषे स्रष्ट्रत्वनिराकरणं)

२.९ रागविरागयोः योगः सृष्टिश्च। (सृष्टिं प्रति मुख्यं निमित्तकारणं)

२.१० महदादिक्रमेण पञ्चभूतानां। (पुरुषमुक्तिनिमित्ता महदादिसृष्टिः)

२.११ आत्मार्थत्वात्सृष्टेः नैषामात्मार्थ आरम्भः। (पुरुषमुक्तिनिमित्ता महदादिसृष्टिः)

२.१२ दिक्कालावाकाशादिभ्यः। (दिक्कालयोः सृष्टिः)

२.१३ अध्यवसायो बुद्धिः। (महत्तत्व स्वरूप कार्यादिः)

२.१४ तत्कार्यं धर्मादि। (महत्तत्व स्वरूप कार्यादिः)

२.१५ महदुपरागाद्विपरीतं। (महत्तत्व स्वरूप कार्यादिः)

२.१६ अभिमानोऽहङ्कारः। (अहङ्कारतत्वस्वरूपकार्यादिः)

२.१७ एकादश पञ्चतन्मात्रं तत्कार्यं। (अहङ्कारतत्वस्वरूपकार्यादिः)

२.१८ सात्विकं एकादशकं प्रवर्तते वैकृतादहङ्कारात्। (अहङ्कारतत्वस्वरूपकार्यादिः)

२.१९ कर्मेन्द्रिय बुद्धीन्द्रियैरान्तरमेकादशकं। (इन्द्रियाणां स्वरूपं)

२.२० आहङ्कारिकत्वश्रुतेः न भौतिकानि। (इन्द्रियाणां स्वरूपं)

२.२१ देवतालयश्रुतिर्नारम्भकस्य। (इन्द्रियाणां स्वरूपं)

२.२२ तदुत्पत्तिश्रुतेर्विनाशदर्शनाच्च। (इन्द्रियाणां अनित्यता)

२.२३ अतीन्द्रियं इन्द्रियं भ्रान्तानामधिष्ठाने। (गोलकानामेवेन्द्रियत्व निराकरणं)

२.२४ शक्तिभेदेऽपि भेदसिद्धौ नैकत्वं। (एकेन्द्रियवादनिरासः)

२.२५ न कल्पनाविरोधः प्रमाणदृष्टस्य। (एकेन्द्रियवादनिरासः)

२.२६ उभयात्मकं च मनः। (मनसः ज्ञानकर्मोभयात्मकत्वं)

२.२७ गुणपरिणामभेदान्नानात्वमवस्थावत्। (मनसः ज्ञानकर्मोभयात्मकत्वं)

२.२८ रूपादिरसमलान्त उभयोः। (इन्द्रियाणां विषयाः)

२.२९ द्रष्टृत्वादिरात्मनः करणत्वमिन्द्रियाणां। (इन्द्रियाणां आत्मोकारकत्वं)

२.३० त्रयाणां स्वालक्षण्यं। (अन्तःकरणत्रयस्य असाधारण्यः साधारण्यश्च वृत्तयः)

२.३१ सामान्यकरणवृत्तिः प्राणाद्याः वायवः पञ्च। (अन्तःकरणत्रयस्य असाधारण्यः साधारण्यश्चवृत्तयः)

२.३२ क्रमशोऽक्रमशश्चेन्द्रियवृत्तिः। (इन्द्रियवृत्तेः क्रमिकत्वनियमाभावः)

२.३३ वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः। (पञ्चविधाः धीवृत्तयः)

२.३४ तन्निवृत्तावुपशान्तोपरागः स्वस्थः। (वृत्त्युपसंहारदशायामेव पुरुषस्य स्वरूपेऽवस्थितिः)

२.३५ कुसुमवच्च मणिः। (वृत्त्युपसंहारदशायामेव पुरुषस्य स्वरूपेऽवस्थितिः)

२.३६ पुरुषार्थं करणोद्भवोऽप्यदृष्टोल्लासात्। (इन्द्रियप्रवृत्त्युपाधिः)

२.३७ धेनुवद्वत्साय। (इन्द्रियप्रवृत्त्युपाधिः)

२.३८ करणं त्रयोदशाविधं अवान्तरभेदात्। (करणानां त्रयोदशत्वं)

२.३९ इन्द्रियेषु साधकतमत्वगुणयोगात् कुठारवत्। (करणानां त्रयोदशत्वं)

२.४० द्वयोः प्रधानं मनो लोकवत् भृत्यवर्गेषु। (करणेषु गौणमुख्यभावव्यवस्था)

२.४१ अव्यभिचारात्। (करणेषु गौणमुख्यभावव्यवस्था)

२.४२ तथाऽशेषसंस्काराधारत्वात्। (करणेषु गौणमुख्यभावव्यवस्था)

२.४३ स्मृत्याऽनुमानाच्च। (करणेषु गौणमुख्यभावव्यवस्था)

२.४४ सम्भवेन्न स्वतः। (करणेषु गौणमुख्यभावव्यवस्था)

२.४५ आपेक्षिको गुणप्रधानभावः क्रियाविशेषात्। (करणेषु गौणमुख्यभावव्यवस्था)

२.४६ तत्कर्मार्जितत्वात् तदर्थमभिचेष्टा लोकवत्। (करणेषु गौणमुख्यभावव्यवस्था)

२.४७ समानकर्मयोगे बुद्धेः प्राधान्यं लोकवल्लोकवत्। (करणेषु गौणमुख्यभावव्यवस्था)

वैराग्याध्या

३.१ अविशेषात् विशेषारम्भः। (पञ्चतन्मात्रेभ्यः संसृतिबीजस्थूलसृष्टिः)

३.२ तस्माच्छरीरस्य। (पञ्चतन्मात्रेभ्यः संसृतिबीजस्थूलसृष्टिः)

३.३ तदीजात् संसृतिः। (पञ्चतन्मात्रेभ्यः संसृतिबीजस्थूलसृष्टिः)

३.४ आविवेकाच्च प्रवर्तनमविशेषाणां। (संसृतेः विवेकपर्यन्तत्वं)

३.५ उपभोगादितरस्य। (संसृतेः विवेकपर्यन्तत्वं)

३.६ सम्प्रति परिमुक्तो द्वाभ्यां। (संसृतेः विवेकपर्यन्तत्वं)

३.७ मातापितृजं स्थूलं प्रायशः इतरन्न तथा। (स्थूलनदिनर शरीरयोः भेदः)

३.८ पूर्वोत्पत्तेस्तत्कार्यत्वं भोगादेकस्य नेतरस्य। (स्थूलनदिनर शरीरयोः भेदाः)

३.९ सप्तदशैकं लिङ्गं। (लिङ्गशरीरं तत्कार्यं च)

३.१० व्यक्तिभेदः कर्मविशेषात्। (लिङ्गशरीरं तत्कार्यं च)

३.११ तदधिष्ठानाश्रये देहे तद्वादत्तद्वादः। (लिङ्गशरीराधिष्ठानसूक्ष्मदेहाश्रयत्वं स्थूलदेहस्य)

३.१२ न स्वातन्त्र्यात्तदृते छायावच्चित्रवच्च। (लिङ्गशरीराधिष्ठानसूक्ष्मशरीरसत्त्वावश्यकता)

३.१३ मूर्तत्वेऽपि न सङ्घातयोगात् तरणिवत्। (लिङ्गशरीराधिष्ठानसूक्ष्मशरीरसत्त्वावश्यकता)

३.१४ अणुपरिमाणं तत्कृतिश्रुतेः। (लिङ्गशरीरपरिमाणं)

३.१५ तदन्नमयत्वश्रुतेश्च। (लिङ्गशरीरपरिमाणं)

३.१६ पुरुषार्थं संसृतिः लिङ्गानां सूपकारवद्राज्ञः। (लिङ्गशरीरसंसृतेः पुरुषार्थत्वं)

३.१७ पाञ्चभौतिको देहः। (स्थूलशरीरस्वरुपविषये मत भेदाः)

३.१८ चातुर्भौतिकमित्येके। (चैतन्यस्य भूतधर्मत्वा भावः)

३.१९ ऐकभौतिकमित्यपरे। (चैतन्यस्य भूतधर्मत्वा भावः)

३.२० न सांसिद्धिकं चैतन्यं प्रत्येकादृष्टेः। (चैतन्यस्य भूतधर्मत्वा भावः)

३.२१ प्रपञ्चमरणाद्यभावश्च। (चैतन्यस्य भूतधर्मत्वा भावः)

३.२२ मदशक्तिवच्चेत् प्रत्येकपरिदृष्टे सांहत्ये तदुद्भवः। (चैतन्यस्य भूतधर्मत्वा भावः)

३.२३ ज्ञानान्मुक्तिः। (ज्ञानविपर्ययाभ्यां मुक्तिबन्धौ)

३.२४ बन्धो विपर्ययात्। (ज्ञानविपर्ययाभ्यां मुक्तिबन्धौ)

३.२५ नियतकारणत्वान्न समुच्चयविकल्पौ। (तत्वज्ञानमात्रस्य मुक्तिहेतुत्वं)

३.२६ स्वप्नजागराभ्यामिव मायिकामायिकाभ्यां नोभयोर्मुक्तिः पुरुषस्य। (तत्वज्ञानमात्रस्य मुक्तिहेतुत्वं)

३.२७ इतरस्यापि नात्यन्तिकं। (उपासनात्मकज्ञानस्य मुक्तिहेतुत्वाभावः)

३.२८ सङ्कल्पितेऽप्येवं। (उपासनात्मकज्ञानस्य मुक्तिहेतुत्वाभावः)

३.२९ भावनोपचयात् शुद्धस्य सर्वं प्रकृतिवत्। (उपासनाफलं)

३.३० रागोपहतिः ध्यानं। (ध्यानस्य मुक्तिसाधनज्ञानसाधनत्वं)

३.३१ वृत्तिनिरोधात् तत्सिद्धिः। (ध्यानसिद्ध्युपायः)

३.३२ धारणासनस्वकर्मणा तत्सिद्धिः। (ध्यानसाधनानि, तेषां लक्षणानि च)

३.३३ निरोधः छर्दिविधारणाभ्यां। (ध्यानसाधनानि, तेषां लक्षणानि च)

३.३४ स्थिरसुखमासनं। (ध्यानसाधनानि, तेषां लक्षणानि च)

३.३५ स्वकर्म स्वाश्रमविहितकर्मानुष्ठानं। (ध्यानसाधनानि, तेषां लक्षणानि च)

३.३६ वैराग्यात् अभ्यासाच्च। (मुख्याधिकारिणः यमादिपञ्चकापेक्षाऽभावः)

३.३७ विपर्ययभेदाः पञ्च। (बन्धहेतुविपर्ययविभागः)

३.३८ अशक्तिरष्टविशतिधा तु। (विपर्ययहेतूनां अशक्तीनां भेदाः)

३.३९ तुष्टिर्नवधा। (बुद्ध्यशक्ति संपादकयोः तुष्टिसिद्ध्योः विभागः)

३.४० सिद्धिरष्टधा। (बुद्ध्यशक्ति संपादकयोः तुष्टिसिद्ध्योः विभागः)

३.४१ अवान्तरभेदाः पूर्ववत्। (विपर्ययाशक्तितुष्टिसिद्धीनां किञ्चिद्विवरणं)

३.४२ एवमितरस्याः। (विपर्ययाशक्तितुष्टिसिद्धीनां किञ्चिद्विवरणं)

३.४३ आध्यत्मिकादि भेदात् नवधा तुष्टिः। (विपर्ययाशक्तितुष्टिसिद्धीनां किञ्चिद्विवरणं)

३.४४ ऊहादिभिः सिद्धिरष्टधा। (विपर्ययाशक्तितुष्टिसिद्धीनां किञ्चिद्विवरणं)

३.४५ नेतरादितरहानेन विना। (तप आदि सिद्धेः तात्त्विकसिद्धित्वाभावः)

३.४६ दैवादिप्रभेदा। (दैवादिसृष्टिप्रभेदाः तदवधयश्च)

३.४७ आब्रह्मस्तम्बपर्यन्तं तत्कृते सृष्टिः आविवेकात्। (दैवादिसृष्टिप्रभेदाः तदवधयश्च)

३.४८ ऊर्ध्वं सत्वविशाला। (गुणप्रभेदेन सृष्टिभेदाः)

३.४९ तमोविशालामूलतः। (गुणप्रभेदेन सृष्टिभेदाः)

३.५० मध्ये रजोविशाला। (गुणप्रभेदेन सृष्टिभेदाः)

३.५१ कर्मवैचित्र्यात् प्रधानचेष्टा गर्भदासवत्। (विचित्रसृष्टीनां निमित्तं)

३.५२ आवृत्तिस्तत्राप्युत्तरोत्तरयोगाद्धेयः। (आमुक्ति सृष्टीनां हेयत्वं)

३.५३ समानं जरामरणादिनं दुःखं। (आमुक्ति सृष्टीनां हेयत्वं)

३.५४ न कारणलयात् कृतकृत्यता मग्नवदुत्थानात्। (प्रकृतिलयस्यापि आत्यन्तिकमुक्तिरूपत्वाभावः)

३.५५ अकार्यत्वेऽपि तद्योगः पारवश्यात्। (प्रकृतिलयस्यापि आत्यन्तिकमुक्तिरूपत्वाभावः)

३.५६ स हि सर्ववित् सर्वकर्ता। (प्रकृतिलयस्यापि आत्यन्तिकमुक्तिरूपत्वाभावः)

३.५७ ईदृशेश्वरसिद्धिः सिद्धा। (प्रकृतिलीनस्यैव जन्येश्वरत्वं)

३.५८ प्रधानसृष्टिः परार्थं स्वतोऽप्यभोक्तृत्वात्। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनं च)

३.५९ उष्ट्रकुङ्कुमवहनवत्। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनं च)

३.६० अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनंच)

३.६१ कर्मवत् दृष्टेर्वा कालादेः। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनंच)

३.६२ स्वभावाच्चेष्टितमनभिसन्धानात् भृत्यवत्। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनंच)

३.६३ कर्माकृष्टेर्वाऽनादितः। (प्रधानकर्तृकसृष्टेः उपपात्तिः प्रयोजनंच)

३.६४ विविक्तबोधात् सृष्टिनिवृत्तिः प्रधानस्य सूदवत् पाके। (सृष्टिनिवृत्तिहेतुः)

३.६५ इतरइतरवत्तद्दोषात्। (सृष्टिनिवृत्तिहेतुः)

३.६६ द्वयोरेकतस्य वौदासीन्यमपवर्गः। (सृष्टिनिवृत्तिहेतुः)

३.६७ अन्यसृष्ट्युपरागेऽपि न विरज्य (म) ते प्रबुद्धरज्जुतत्वस्येवोरगः। (सृष्टिविशेषनिवृत्तेः सृष्ट्यन्तरप्रवृत्त्युपघातकत्वाभावः)

३.६८ कर्मनिमित्तयोगाच्च। (सृष्टिविशेषनिवृत्तेः सृष्ट्यन्तरप्रवृत्त्युपघातकत्वीभावः)

३.६९ नैरपेक्ष्येऽपि प्रकृत्युपकारेऽविवेको निमित्तं। (प्रकृतिप्रवृत्तिनिवृत्त्योः नियामकोपपादनं)

३.७० नर्तकीवत् प्रवृत्तस्यापि निवृत्तिः चारितार्थ्यात्। (प्रकृतिप्रवृत्तिनिवृत्त्योः नियामकोपपादनं)

३.७१ दोषबोधेऽपि नोपसर्पणं प्रधानस्य कुलवधूवत्। (प्रकृतिप्रवृत्तिनिवृत्त्योः नियामकोपपादनं)

३.७२ नैकान्ततो बन्धमोक्षौ पुरुषस्य अविवेकादृते। (बन्धमोक्षयोः आत्मगतत्वाभावः)

३.७३ प्रकृतेराञ्जस्यात् ससङ्गत्वात् पशुवत्। (बन्धमोक्षयोः आत्मगतत्वाभावः)

३.७४ रूपैः सप्तभिः आत्मानं बध्नाति प्रधानं कोशकारवद्विमोचयेत्येकरूपेण। (बन्धमोक्षनिमित्तानि)

३.७५ निमित्तत्वमविवेकस्य न दृष्टहानिः। (बन्धमोक्षनिमित्तानि)

३.७६ तत्वाभ्यासान्नेति नेतीति त्यागात् विवेकसिद्धिः। (तत्त्वाभ्यासस्यैव विवेकहेतुत्वं)

३.७७ अधिकारिप्रभेदान्न नियमः। (तत्त्वाभ्यासस्यैव विवेकहेतुत्वं)

३.७८ बाधितानुवृत्त्या मध्यविवेकतोऽप्युपभोगः। (विवेकविशेषस्यैव निस्तारोपायत्वं)

३.७९ जीवन्मुक्तश्च। (विवेकविशेषस्यैव निस्तारोपायत्वं)

३.८० उपदेश्योपदेष्टृत्वात्तत्सिद्धिः। (जीवन्मुक्तिसाधनं)

३.८१ श्रुतिश्च। (जीवन्मुक्तिसाधनं)

३.८२ इतरथा अन्धपरम्परा। (जीवन्मुक्तिसाधनं)

३.८३ चक्रभ्रमणवत् धृतशरीरः। (जीवन्मुक्तिसाधनं)

३.८४ संस्कारलेशतः तत्सिद्धिः। (जीवन्मुक्तिसाधनं)

३.८५ विवेकान्निः शेषदुःखनिवृत्तौ कृतकृत्यो नेतरान्नेतरात्। (पुरुषे विवेकस्यैव कृतकृत्यताहेतुत्वं)

आख्यायिका

४.१ राजपुत्रवत् तत्वोपदेशात्। (तत्त्वोपदेशस्य विवेकहेतुत्वं)

४.२ पिशाचवदन्यार्थोपदेशेऽपि। (तत्त्वोपदेशस्य विवेकहेतुत्वं)

४.३ आवृत्तिरसकृदुपदेशात्। (तत्त्वोपदेशस्य विवेकहेतुत्वं)

४.४ पितापुत्रवदुभयोर्दृष्टत्वात्। (क्वचिदनुमानात् देहस्य भङ्गुरताज्ञानोपपत्तिः)

४.५ श्येनवत् सुखदुःखी त्याग वियोगाभ्यां। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.६ अहिनिर्ल्वयिनीवत्। (ज्ञाननिष्पत्त्यङ्ग मनोधमाः)

४.७ छिन्नहस्तवद्वा। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.८ असाधनानुचिन्तनं बन्धाय भरतवत्। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.९ बहुभिर्योगे विरोधः रागादिभिः कुमारी कङ्कण (शङ्ख) वत्। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.१० द्वाभ्यामपि तथैव। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.११ निराशः सुखी पिङ्गलावत्। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.१२ अनारम्भेऽपि परगृहे सुखी सर्पवत्। (ज्ञाननिष्पत्त्यङ्ग मनोधर्माः)

४.१३ बहुशास्त्र गुरूपासनेऽपि सारादानं षट्पदवत्। (सारग्रहणावश्यकता)

४.१४ इषुकारवन्नैकचित्तस्य समाधिहानिः। (एकाग्रतावश्यकता)

४.१५ कृतनियमलङ्घनादानर्थक्यं लोकवत्। (शास्त्रविहितनियमानुल्लंघनावश्यकता)

४.१६ तद्विस्मरणेऽपि भेकीवत्। (शास्त्रविहितनियमस्मरणावश्यकता)

४.१७ नोपदेशश्रवणेऽपि कृतकृत्यता परामर्शादृते विरोचनवत्। (श्रुतार्थमननावश्यकता)

४.१८ दृष्टस्तयोरिन्द्रस्य। (श्रुतार्थमननावश्यकता)

४.१९ प्रणतिब्रह्मचर्योपसर्पणानि कृत्वा सिद्धिः बहुकालात् तद्वत्। (गुरुसेवा)

४.२० न कालनियमो वामदेववत्। (ज्ञाननिष्पत्तेः कालदेशादिनियमाभावः)

४.२१ अध्यस्तरूपोपासनात् पारम्पर्येण यज्ञोपासकानामिव। (ज्ञाननिष्पत्तेः कालदेशादिनियमाभावः)

४.२२ इतरलाभेऽप्यावृत्तिः पञ्चाग्नियोगतो जन्मश्रुतेः। (पुनरावृत्तिहेतुभूतान्युपासनानि)

४.२३ विरक्तस्य हेयहानमुपादेयोपादानं हंसक्षीरवत्। (ज्ञाननिष्पत्त्यधिकारः)

४.२४ लब्धातिशययोगाद्वा तद्वत्। (ज्ञाननिष्पत्त्यधिकारः)

४.२५ न कामचारित्वं रागोपहते शुकवत्। (रागदोषाः तच्छमनोपायाश्च)

४.२६ गुणयोगात् बद्धः शुकवत्। (रागदोषाः तच्छमनोपायाश्च)

४.२७ न भोगाद्रागशान्तिः मुनिवत्। (रागदोषाः तच्छमनोपायाश्च)

४.२८ दोषदर्शनादुभयोः। (रागदोषाः तच्छमनोपायाश्च)

४.२९ न मलिनचेतस्युपदेश बीजप्ररोहोऽजवत्। (रागदोषाः तच्छमनोपायाश्च)

४.३० नाभासमात्रमपि मलिनदर्पणवत्। (रागदोषाः तच्छमनोपायाश्च)

४.३१ न तज्जस्यापि तद्रपता पङ्कजवत्। (रागदोषाः तच्छमनोपायाश्च)

४.३२ न भूतियोगेऽपि कृतकृत्यता उपास्यसिद्धिवत् उपास्यसिद्धिवत्। (अष्टैश्वर्याणामपि मुक्तिसाम्याभावः)

परमतनिर्जयः

५.१ मङ्गलाचरणं शिष्टाचारात् फलदर्शनात् श्रुतितश्चेति। (मङ्गलाचरणप्रयोजनं)

५.२ नेश्वराधिष्ठिते फलनिष्पत्तिः कर्मणा तत्सिद्धेः। (ईश्वरस्य फलदातृत्वाभवः)

५.३ स्वोपकारादधिष्ठानं लोकवत्। (ईश्वरस्य फलदातृत्वाभवः)

५.४ लौकिकेश्वरवदितरथा। (ईश्वरस्य फलदातृत्वाभवः)

५.५ पारिभाषिको वा। (ईश्वरस्य फलदातृत्वाभवः)

५.६ न रागादृते तत्सिद्धिः प्रतिनियतकारणत्वात्। (ईश्वरस्य फलदातृत्वाभवः)

५.७ तद्योगेऽपि न नित्यमुक्तः। (ईश्वरस्य फलदातृत्वाभवः)

५.८ प्रधानशक्तियोगाच्चेत् सङ्गापत्तिः। (ईश्वरस्य फलदातृवाभवः)

५.९ सत्तामात्राच्चेत्सर्वैश्वर्यं। (ईश्वरस्य फलदातृत्वाभवः)

५.१० प्रमाणाभावान्न तत्सिद्धिः। (ईश्वरे प्रमाणाभावः)

५.११ सम्बन्धाभावान्नानुमानं। (ईश्वरे प्रमाणाभावः)

५.१२ श्रुतिरपि प्रधानकार्यत्वस्य। (ईश्वरे प्रमाणाभावः)

५.१३ नाविद्याशक्तियोगो निस्सङ्गस्य। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१४ तद्योगे तत्सिद्धावन्योन्याश्रयत्वं। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१५ न बीजाङ्कुरवत् सादिसंसारश्रुतेः। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१६ विद्यातोऽन्यत्वे ब्रह्मबाधप्रसङ्गः। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१७ अबाधे नैष्फल्यं। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१८ विद्याबाध्यत्वे जगतोऽप्येवं। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.१९ तद्रूपत्वे सादित्वं। (बन्धस्य अविद्यानिमित्तकत्ववादनिरासः)

५.२० न धर्मापलापः प्रकृतिकार्यवैचित्र्यात्। (प्रधानप्रवृत्तेः कर्मनिमित्तकत्वनिरासः)

५.२१ श्रुतिलिङ्गादिभिः तत्सिद्धिः। (प्रधानप्रवृत्तेः कर्मनिमित्तकत्वनिरासः)

५.२२ न नियमः प्रमाणान्तरावकाशात्। (प्रधानप्रवृत्तेः कर्मनिमित्तकत्वनिरासः)

५.२३ उभयत्राप्येवं। (प्रधानप्रवृत्तेः कर्मनिमित्तकत्वनिरासः)

५.२४ अर्थात् सिद्धिश्चेत्समानमुभयोः। (प्रधानप्रवृत्तेः कर्मनिमित्तकत्वनिरासः)

५.२५ अन्तः करणधर्मत्वं धर्मादीनां। (धर्माधर्मयोः अन्तः करणधर्मत्वं)

५.२६ गुणादीनां च नात्यन्तबाधः। (सत्वादिगुणतद्धर्माणां अत्यन्त निषेधस्यायुक्तता)

५.२७ पञ्चावयवयोगात् सुखसंवित्तिः। (सत्वादिगुणतद्धर्माणां अत्यन्त निषेधस्यायुक्तता)

५.२८ न सकृद्ग्रहणात्सम्बन्ध सिद्धिः। (व्याप्तिस्वरूपं तत्साधनं च),पू

५.२९ नियतधर्मसाहित्यमुभयोरेकतरस्य वा व्याप्तिः। (व्याप्तिस्वरूपं तत्साधनं च),सि

५.३० न तत्वान्तरं वस्तुकल्पनाप्रसक्तेः। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३१ निजशक्त्युद्भवमित्याचार्याः। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३२ आधेयशक्तियोग इति पञ्चशिखः। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३३ न स्वरूपशक्तिर्नियमः पुनर्वादप्रसक्तेः। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३४ विशेषेणानर्थक्य प्रसक्तेः। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३५ पल्लवादिष्वनुपपत्तेश्च। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३६ आधेयशक्तिसिद्धौ निजशक्तियोगः समानन्यायात्। (परोक्तव्याप्तिस्वरूपादिखण्डनं)

५.३७ वाच्यवाचक भावः सम्बन्धः शब्दार्थयोः। (शब्दप्रामाण्यसाधनं)

५.३८ त्रिभिस्साम्बन्धसिद्धिः। (लोकवेदयोः शक्तिग्रहणोपायाः)

५.३९ न कार्ये नियमः उभयथा दर्शनात्। (लोकवेदयोः शक्तिग्रहणोपायाः)

५.४० लोके व्युत्पन्नस्य वेदार्थप्रतीतिः। (लोकवेदयोः शक्तिग्रहणोपायाः)

५.४१ न त्रिभिरपौरुषेयत्वाद्वेदस्य तदर्थस्याप्यतीन्द्रियत्वात्। (वेदस्य अतीन्द्रियार्थत्वनिराकरणं),पू

५.४२ न यज्ञादेः स्वरूपतो धर्मत्वं वैशिष्ट्यात्। (वेदस्य अतीन्द्रियार्थत्वनिराकरणं),सि

५.४३ निजशक्तिः व्युत्पत्त्या व्यवच्छिद्यते। (वैदिकशब्दशक्तिग्रहव्यवस्था)

५.४४ योग्यायोग्येषु प्रतीतिजनकत्वात्तत्सिद्धिः। (वैदिकशब्दशक्तिग्रहव्यवस्था)

५.४५ न नित्यत्वं वेदानां कार्यत्वश्रुतेः। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.४६ न पौरुषेयत्वं तत्कर्तुः पुरुषस्याभावात्। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.४७ मुक्तामुक्तयोरयोग्यत्वात्। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.४८ नापौरुषेयत्वान्नित्यत्वमङ्कुरादिवत्। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.४९ तेषामपि तद्योगे दृष्टबाधादिप्रसक्तिः। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.५० यस्मिन् अदृष्टेऽपि कृतबुद्धिरुपजायते तत्पौरुषेयं। (वेदस्य नित्यत्वापौरूषेयत्वयोर्निरासः)

५.५१ निजशक्त्यभिव्यक्तेः स्वतः प्रामाण्यं। (वेदानां स्वतः प्रामाण्यं)

५.५२ नासतः ख्यानं नृशृङ्गवत्। (गुणानां नात्यन्तासत्त्वं अनिर्वचनीयत्वं वा)

५.५३ न सतो बाधदर्नात्। (गुणानां नात्यन्तासत्त्वं अनिर्वचनीयत्वं वा)

५.५४ नानिर्वचनीयस्य तदभावात्। (गुणानां नात्यन्तासत्त्वं अनिर्वचनीयत्वं वा)

५.५५ नान्यथाख्यातिः स्ववचोव्याघातात्। (अन्यथाख्यातिनिरासः)

५.५६ सदसत्ख्यातिः बाधाबाधात्। (सदसत्ख्याति निरासः)

५.५७ प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः। (स्फोटनिरासः)

५.५८ न शब्दनित्यत्वं कार्यताप्रतीतेः। (वर्णनित्यत्वनिरासः)

५.५९ पूर्वसिद्ध सत्त्वस्याभिव्यक्तिः दीपेनेव घटस्य। (वर्णनित्यत्वनिरासः),पू

५.६० सत्कार्यसिद्धान्तश्चेत् सिद्धसाधनं। (वर्णनित्यत्वनिरासः),सि

५.६१ नाद्वैतमात्मनो लिङ्गात् तद्भेदप्रतीतेः। (आत्माद्वैत निरासः)

५.६२ नानात्माऽपि प्रत्यक्षबाधात्। (आत्माद्वैत निरासः)

५.६३ नोभाभ्यां तेनैव। (आत्माद्वैत निरासः)

५.६४ अन्यपरत्वमविवेकानां तत्र। (आत्माद्वैतनिरासः)

५.६५ नात्माऽविद्या नोभयं जगदुपादानकारणं निस्सङ्गत्वात्। (आत्माद्वैतनिरासः)

५.६६ नैकस्यानन्दचिद्रूपत्वे द्वयोर्भेदात्। (आत्माद्वैतनिरासः)

५.६७ दुःखनिवृत्तेर्गौणः। (आत्माद्वैतनिरासः)

५.६८ विमुक्तिप्रशंसा मन्दानां। (आत्माद्वैतनिरासः)

५.६९ न व्यापकत्वं मनसः करणत्वादिन्द्रियत्वाद्वा वास्यादिवच्चक्षुरादिवच्च। (मनसोनिरवयवत्व विभुत्वनित्यनां निरासः)

५.७० सक्रियत्वात् गतिश्रुतेः। (मनसोनिरवयवत्व विभुत्वनित्यनां निरासः)

५.७१ न निर्भागत्वं तद्योगात् घटवत्। (मनसोनिरवयवत्व विभुत्वनित्यनां निरासः)

६.७२ प्रकृतिपुरुषयोरन्यत्सर्वमनित्यं। (प्रकृतिपुरुषातिरिक्तस्य सर्वस्यानित्यत्वं)

६.७३ न भागलाभो भागिनो निर्भागत्वश्रुतेः। (प्रकृतिपुरुषातिरिक्तस्य सर्वस्यानित्यत्वं)

६.७४ नानन्दाभिव्यक्तिर्मुक्तिः निर्धर्मत्वात्। (मुक्तेः आनन्दाभिव्यक्तिरूपत्वाभावः)

६.७५ न विशेषगुणोच्छित्तिस्तद्वत्। (मुक्तेः विशेषगुणोच्छेदस्वरूपत्वाभावः)

६.७६ न विशेषगतिः निष्क्रियस्य। (मुक्तेः लोकान्तरगतिरूपत्वाभावः)

६.७७ नाकारोपरागोच्छित्तिः क्षणिकत्वादिदोषात्। (मुक्तेः उपरागनाश, सर्वोच्छित्तिरूपत्वाभावः)

६.७८ न सर्वोच्छित्तिरपुरुषार्थत्वादिदेषात्। (मुक्तेः शून्यादिरूपत्वानुपपत्तिः)

६.७९ एवं शून्यमपि। (मुक्तेः शून्यादिरूपत्वानुपपत्तिः)

५.८० संयोगाश्च विभागान्ता इति न देशादिलाभोऽपि। (मुक्तेः स्वाम्यविशेषादिरूपत्वाभावः)

५.८१ न भागियोगो भागस्य। (मुक्तेः लयरूपत्वाभावः)

५.८२ नाणिमादियोगोऽप्यवश्यंभावित्वात् तदुच्छित्तेरितरयोगवत्। (मुक्तेः ऐश्वर्य पदवीविशेषादिरूपत्वाभावः)

५.८३ नेन्द्रादिपदयोगोऽपि तद्वत्। (मुक्तेः ऐशेवर्य पदवीविशेषादिरूपत्वाभावः)

५.८४ न भूतप्रकृतिकत्वमिन्द्रियाणामाहङ्कारिकत्वश्रुतेः। (इन्द्रियाणां भूतप्रकृतिकत्वनिरासः)

५.८५ न षट् पदार्थनियमस्तद्बोधान्मुक्तिः। (परोक्त पदार्थसंख्यानियमस्य, तद्बोधस्य मुक्तिहेतुतायाश्च निरासः)

५.८६ षोडशादिष्वप्येवं। (परोक्त पदार्थसंख्यानियमस्य, तद्बोधस्य मुक्तिहेतुतायाश्च निरासः)

५.८७ नाणुनित्यता तत्कार्यत्वश्रुतेः। (अणूनां नित्यत्वनिरासः)

५.८८ न निर्भागत्वं कार्यत्वात्। (अणूनां नित्यत्वनिरासः)

५.८९ न रूपनिबन्धनात् प्रत्यक्षनियमः। (परिमाणस्वरूपादि निर्णयः)

५.९० न परिमाणचातुर्विध्यं द्वाभ्यां तद्योगात्। (सामान्यसाधनं, तत्स्वरूपं च)

५.९१ अनित्यत्वेऽपि स्थिरतायोगात् प्रत्यभिज्ञानं सामान्यस्य। (सामान्यसाधनं, तत्स्वरूपं च)

५,९२ न तदपलापस्तस्मात्। (सामान्यसाधनं, तत्स्वरूपं च)

५.९३ नान्यनिवृत्तिरूपत्वं भावप्रतीतेः। (साहश्यस्य तत्त्वान्तरता निराकरणं)

५.९४ न तत्त्वान्तरं सादृश्य प्रत्यक्षोपलब्धेः। (सादृश्यस्य तत्त्वान्तरता निराकरणं)

५.९५ निजशक्त्यभिव्यक्तिर्वा वैशिष्ट्यात्तदुपलब्धेः। (सादृश्यस्य तत्त्वान्तरता निराकरणं)

५.९६ न संज्ञासंज्ञि सम्बन्धोऽपि। (सादृश्यस्य तत्त्वान्तरता निराकरणं)

५.९७ न सम्बन्धनित्यतोभयानित्यत्वात्। (सादृश्यस्य तत्त्वान्तरता निराकरणं)

५.९८ नाजः सम्बन्धः धर्मिग्राहकप्रमाणबाधात्। (सादृश्यस्य तत्त्वान्तरता निराकरणं)

५.९९ न समवायोऽस्ति प्रमाणाभावात्। (समवाय निरासः)

५.१०० उभयत्राप्यन्यथासिद्धेर्न प्रत्यक्षमनुमानं वा। (समवायनिरासः)

५.१०१ नानुमेयत्वमेव क्रियायाः नेदिष्ठस्य तत्तद्वतोरेवापरोक्षप्रतीतेः। (क्रियायाः अनुमेयतानैयत्यनिरासः)

५.१०२ न पाञ्चभौतिकं शरीरं बहूनामुपादानायोगात्। (शरीरस्य पाञ्चभौतिकत्वनिरासः)

५.१०३ न स्थूलमिति नियमः आतिवाहिकस्यापि विद्यामानत्वात्। (शरीरसामान्यस्य स्थूलत्वनिरासः)

५.१०४ नाप्राप्तप्रकाशकत्वमिन्द्रियाणां अप्राप्तेः सर्वप्राप्तेर्वा। (इन्द्रियाणां प्राप्यकारित्वनिरूपणं)

५.१०५ न तेजोऽपसर्पणात् तैजस चक्षुः वृत्तितस्तत्सिद्धेः। (इन्द्रियाणां प्राप्यकारित्वनिरूपणं)

५.१०६ प्राप्तर्थप्रकाशलिङ्गात् वृत्तिसिद्धिः। (इन्द्रियाणां प्राप्यकारित्वनिरूपणं)

५.१०७ भागगुणाभ्यां तत्वान्तरं वृत्तिः सम्बन्धार्थं सर्पतीति। (वृत्तेः स्वरूपं)

५.१०८ न द्रव्यनियमस्तद्योगात्। (वृत्तेः स्वरूपं)

५.१०९ न देशभेदेऽप्यन्योपादानताऽस्मदादिवन्नियमः। (इन्द्रियाणां अभौतिकत्वं)

५.११० निमित्तव्यपदेशात् तदव्यपदेशः। (इन्द्रियाणां अभौतिकत्वं)

५.१११ ऊष्मजाण्डजजरायुजोद्भिज्जसाङ्काल्पिक सांसिद्धिकं चेति न नियमः। (स्थूलशरीरविशेषाः)

५.११२ सर्वेषु पृथिव्युपादानं असाधारण्यात् तद्व्यपदेशः पूर्ववत्। (स्थूलशरीरविशेषाः)

५.११३ न देहारम्भकस्य प्राणत्वमिन्द्रियशक्तितस्तत्सिद्धेः। (प्रणस्य देहारम्भकत्वाभावः)

५.११४ भोक्तुराधिष्ठानात् भोगायतननिर्माणं अन्यथा पूतिभावप्रसङ्गात्। (देहाधिष्ठातृ निर्णयः)

५.११५ भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्त्यात्। (देहाधिष्ठातृ निर्णयः)

५.११६ समाधिसुषुप्तिमोक्षेषु ब्रह्मरूपता। (आत्मनो नित्यमुक्तत्वोपपादनं)

५.११७ द्वयोः सबीजमन्यत्र तद्धतिः। (सुषुप्तिसमाधिभ्यां मोक्षे विशएषः)

५.११८ द्वयोरिव त्रयस्यापि दृष्टत्वात् न तु द्वौ। (मोक्षे प्रमाणं)

५.११९ वासनया न स्वार्थख्यापनं दोषयोगेऽपि न निमित्तस्य प्रधानबाधकत्वं। (सुषुप्तौ आत्मनः ब्रह्मरूपत्व साधनं)

५.१२० एकः संस्कारः क्रियानिर्वर्तकः न तु प्रतिक्रियं संस्कारभेदः बहुकल्पनाप्रसक्तेः। (जीवन्मुक्तेऽपि संस्कारानुवृत्तिः)

५.१२१ न बाह्यबुद्धिनियमः वृक्षगुल्मलतौषधिवनस्पतितृणवीरूधादीनामपि भोक्तृभोगायतनत्वं पूर्ववत्। (शरीरसामान्ये बाह्यज्ञानसत्तानियमाभावः)

५.१२२ स्मृतेश्च। (शरीरसामान्ये बाह्यज्ञानसत्तानियमाभावः)

५.१२३ न देहमात्रतः कर्माधिकारित्वं वैशिष्टयश्रुतेः। (शरीरसामान्ये बाह्यज्ञानसत्तानियमाभावः)

५.१२४ त्रिधात्रयाणां व्यवस्था कर्मदेहोपभोगदेहोभयदेहाः। (देहेषु चातुर्विध्यं)

५.१२५ न किञ्चिदप्यनुशयिनः। (देहेषु चातुर्विध्यं)

५.१२६ न बुद्ध्यादिनित्यत्वं आश्रयाविशेषेऽपि वह्निवत्। (बुद्धीच्छादीनां नित्यतानिरासः)

५.१२७ आश्रयासिद्धेश्च। (बुद्धीच्छादीनां नित्यतानिरासः)

५.१२८ योगसिद्धयोऽप्यौषधादिसिद्धिवन्नापलापनीयाः। (सिद्धीनां सत्यता)

५.१२९ न भूतचैतन्यं प्रत्येकादृष्टेः सांहत्येऽपि च सांहत्येऽपि च। (भूतचैतन्यवाद निरासः)

तन्त्राध्यायः

६.१ अस्त्यात्मा नास्तित्वसाधनाभावात्। (आत्मास्तित्व निरूपणं)

६.२ देहादिव्यतिरिक्तोऽसौ वैचित्र्यात्। (आत्मास्तित्व निरूपणं)

६.३ षष्ठीव्यपदेशादपि। (आत्मास्तित्व निरूपणं)

६.४ न शिलापुत्रवत्, धर्मिग्राहकमानबाधात्। (आत्मास्तित्व निरूपणं)

६.५ अत्यन्तदुःखनिवृत्त्या कृतकृत्यता। (आत्मनः कृतकृत्यतानिमित्तं)

६.६ यथा दुःखात् क्लेशः पुरुषस्य, न तथा सुखाभिलाषः। (आत्मनः कृतकृत्यतानिमित्तं)

६.७ कुत्रापि कोऽपि सुखीति। (दुःखनिवृत्तेरेव पुरुषार्थत्वं)

६.८ तदपि दुःखशबलितमिति दुःखपक्षे निक्षिपन्ते विवेचकाः। (दुःखनिवृत्तेरेव पुरुषार्थत्वं)

६.९ सुखलाभाभावादपुरुषार्थत्वामिति चेन्न द्वैविध्यात्। (दुःखनिवृत्तेरेव पुरुषार्थत्वं)

६.१० निर्गुणत्वमात्मनोऽसङ्गत्वादिश्रुतेः। (गुणबन्धस्यैव अविवेकमूलत्वं),पू

६.११ परमधर्मत्वेऽपि तत्सिद्धिरविवेकात्। (गुणबन्धस्यैव अविवेकमूलत्वं),सि

६.१२ अनादिरविवेकः अन्यथा दोषद्वयप्रसक्तेः। (अविवेकस्यानादित्वं)

६.१३ न नित्यः स्यादात्मवदन्यथाऽनुच्छित्तिः। (अविवेकस्यानादित्वं)

६.१४ प्रतिनियतकारण नाश्यत्वमस्य ध्वान्तवत्। (मुक्तिकारणविवरणं)

६.१५ अत्रापि प्रतिनियमोऽन्वयव्यतिरेकात्। (मुक्तिकारणविवरणं)

६.१६ प्रकारान्तरासम्भवादविवेक एव बन्धः। (बन्धस्वरूपं)

६.१७ न मुक्तस्य पुनर्बन्धयोगोऽप्यनावृत्ति श्रुतेः। (मुक्तेर्नित्यत्वं)

६.१८ अपुरुषार्थत्वमन्यथा। (मुक्तेर्नित्यत्वं)

६.१९ अविशेषापत्तिरुभयोः। (मुक्तेर्नित्यत्वं)

६.२० मुक्तिरन्तराय ध्वस्तेर्न परः। (अन्तरायध्वंसमात्रस्य मुक्तिरूपत्वं)

६.२१ तत्राप्यविरोधः। (अन्तरायध्वंसमात्रस्य मुक्तिरूपत्वं)

६.२२ अधिकारित्रैविध्यान्न नियमः। (अधिकारिभेदेन अन्तरायध्वसनिष्पत्तिभेदः)

६.२३ दाढ्यार्थमुत्तरेषां। (नियमानां आवश्यकता)

६.२४ स्थिरसुखमासनमिति न नियमः। (नियमानां आवश्यकता)

६.२५ ध्यानं निर्विषयं मनः। (ध्यानस्वरूपं)

६.२६ उभयथाऽप्यविशेषश्चेन्नैवमुपरागनिरोधाद्विशेषः। (योगस्यावश्कता)

६.२७ निस्सङ्गेऽप्युपरागोऽविवेकात्। (उपरागहेतुः)

६.२८ जपास्फटिकयोरिव नोपरागः किन्त्वभिमानः। (उपरागहेतुः)

६.२९ ध्यानधारणाभ्यास वैराग्यादिभिः तन्निरोधः। (उपराग निरोधहेतुः)

६.३० लयविक्षेपयोर्व्यावृत्त्येत्याचार्याः। (उपराग निरोधहेतुः)

६.३१ न स्थाननियमः चित्तप्रसादात्। (उपराग निरोधहेतुः)

६.३२ प्रतेराद्योपादानताऽन्येषां कार्यत्वश्रुतेः। (प्रकृतेरेव जगन्मूलता)

६.३३ नित्यत्वेऽपि नात्मनो योग्यत्वाभावात्। (प्रकृतेरेव जगन्मूलता)

६.३४ श्रुतिविरोधान्न कुतर्कापसदस्यात्मलाभः। (प्रकृतेरेव जगन्मूलता)

६.३५ पारम्पर्येऽपि प्रधानानुवृत्तिरणुवत्। (प्रकृतेरेव जगन्मूलता)

६.३६ सर्वत्र कार्यदर्शनात् विभुत्वं। (प्रकृतेरेव जगन्मूलता)

६.३७ गतियोगेऽप्याद्यकारणताहानिरणुवत्। (प्रकृतेरेव जगन्मूलता)

६.३८ प्रसिद्धाधिक्यं प्रधानस्य न नियमः। (प्रकृतेरेव जगन्मूलता)

६.३९ सत्त्वादीनामतद्धर्मत्वं तद्रूपत्वात्। (प्रकृतेः गुणरूपतासाधनं)

६.४० अनुपभोगेऽपि पुमर्थं सृष्टिः प्रधानस्योष्ट्रकुङ्कुमवहनवत्। (प्रधानप्रवृत्तिहेतुः)

६.४१ कर्मवैचित्र्यात्सृष्टिवैचित्र्यं। (प्रधानप्रवृत्तिहेतुः)

६.४२ साम्यवैषम्याभ्यां कार्यद्वयं। (सृष्टिप्रलनिमित्ते)

६.४३ विमुक्तबोधान्न सृष्टिः प्रधानस्य लोकवत्। (प्रधानस्यसृष्ट्युपरमनिमित्तादि निरूपणं)

६.४४ नान्योपसर्पणेऽपि मुक्तोपभोगः निमित्ताभावात्। (प्रधानस्यसृष्ट्युपरमनिमित्तादि निरूपणं)

६.४५ पुरुषबहुत्वं व्यवस्थातः। (प्रघानस्यसृष्ट्युपरमनिमित्तादि निरूपणं)

६.४६ उपाधिश्चेत् तत्सिद्धौ पुनर्द्वैतं। (उपाधिभेदात् बन्धमोक्षव्यवस्थाभावः)

६.४७ द्वाभ्यामपि प्रमाणविरोधः। (अविद्यापुरुषयोरस्तित्वाङ्गीकारे अद्वैद्यविरोधः)

६.४८ द्वाभ्यामप्यविरोधान्नपूर्वमुत्तरं च साधाकाभावात्। (अविधापुरुषयोरास्तित्वाङ्गीकारे अद्वैद्यविरोधः)

६.४९ प्रकाशतस्तत्सिद्धौ कर्मकर्तृविरोधः। (आत्मनः प्रकाशस्वरूपत्वे दोषः)

६.५० जडव्यावृत्तो जडं प्रकाशयति चिद्रूपः। (आत्मनः प्रकाशस्वरूपत्वे दोषः)

६.५१ न श्रुतिविरोधो रागिणां वेराग्याय तत्सिद्धेः। (अद्वैतश्रुतेः स्वपक्षे सामरस्यं)

६.५२ जगत्सत्यत्वमदुष्टकरणजन्यत्वम् बाधकाभावात्। (जगत्सत्यत्वसाधनं)

६.५३ प्रकारान्तरासंभवात्सदुत्पत्तिः। (सत्कार्यवादस्यैव साधुता)

६.५४ अहङ्कारः कर्ता न पुरुषः। (अहङ्कारस्यैव कर्तृत्वं)

६.५५ चिदवसाना भुक्तिः तत्कर्मार्जिततत्वात्। (भोगोपाधिः)

६.५६ चन्द्रादिलोकेप्यावृत्तिः निमित्तसद्भावात्। (पुनरावृत्तिहेतुः)

६.५७ लोकस्य नोपदेशात् सिद्धिः पूर्ववत्। (पुनरावृत्तिहेतुः)

६.५८ पाराम्पर्येण तत्सिद्धौ विमुक्तिश्रुतिः। (पुनरावृत्तिहेतुः)

६.५९ गतिश्रुतेश्च व्यापकत्वेऽपि उपाधियोगात् भोगदेशकाललाभः व्योमवत्। (आत्मनो गतिश्रुत्युपपत्तिः)

६.६० अनधिष्ठितस्य पूतिभावप्रसङ्गान्न तत्सिद्धिः। (देहरचनां प्रति भोक्त्रधिष्ठानस्यावश्यकता)

६.६१ अदृष्टद्वाराचेदसम्बद्धस्य तदसम्भवाज्जलादिवदङ्कुरे। (देहरचनां प्रति भोक्त्रधिष्ठानस्यावश्यकता)

६.६२ निर्गुणत्वात्तदसम्भवादहङ्कार धर्माते। (देहरचनां प्रति भोक्त्रधिष्ठानस्यावश्यकता)

६.६३ विशिष्टस्य जीवत्वमन्वयव्यतिरेकात्। (जीवत्वोपाधिः)

६.६४ अहङ्कारकर्त्रधीना कार्यसिद्धिर्नेश्वराधीना प्रमाणाभावात्। (सृष्ट्यादीनां कालमात्रनिमित्ताहङ्कारादिकार्यता)

६.६५ अदृष्टोद्भूतिवत्समानत्वं। (सृष्ट्यादीनां कालमात्रनिमित्ताहङ्कारादिकार्यता)

६.५६ महतोऽन्यत्। (सृष्ट्यादीनां कालमात्रनिमित्ताहङ्कारादिकार्यता)

६.६७ कर्मनिमित्तः प्रकृतेः स्वस्वामिभावोऽप्यनादिः बीजाङ्कुरवत्। (प्रकृतिपुरुषयोः भोग्यभोक्तृभावस्य अनादिकर्मनिमित्तकत्वं)

६.६८ अविवेकनिमित्तो वा पञ्चशिखः। (तत्रैव मतभेदः)

६.६९ लिङ्गशरीरनिमित्तक इति सनन्दनाचार्यः। (पुरुषार्थस्वरूपनिगमनं)

६.७० तत्त्व समाससूत्राणि। (कपिल महर्षि प्रणीतानि)

तत्त्वपादः

१.१ अथातस्तत्त्वसमासः।

१.२ अष्टौ प्रकृतयः।

१.३ षोडश विकाराः।

१.४ पुरुषः।

१.५ त्रैगुण्यं।

१.६ सञ्चरः।

१.७ प्रतिसञ्चरः।

१.८ अध्यात्मं।

१.९ अधिभूतं।

१.१० अधिदैवतं।

प्रकीर्णपादः

२.१ पञ्चाभिबुद्धयः।

२.२ पञ्च कर्मयोनयः।

२.३ पञ्च वायवः।

२.४ पञ्च कर्मात्मानः।

२.५ पञ्चपर्वाऽविद्या।

२.६ अष्टाविंशतिधाऽशक्तिः।

२.७ नवधा तुष्टिः।

२.८ अष्टधा सिद्धिः।

२.९ दशमूलिकार्थाः।

२.१० अनुग्रहः सर्गः।

२.११ चतुर्दशविधो भूतसर्गः।

२.१२ त्रिविधो बन्धः।

२.१३ त्रिविधो मोक्षः।

२.१४ त्रिविधं प्रमाणं।

२.१५ त्रिविधं दुःखं।

२.१६ एतत्परं याथातथ्यं।

२.१७ एतज्ज्ञात्वा कृतकृत्यः स्यात्।

२.१८ नासौ पुनः त्रिविधेन दुःखेनाभिभूयते नाभिभीयते।